# .. ShrI Shankaracharyashtakam ..

# ॥ શ્રીશઙ્કરાચાર્યાષ્ટકમ્ ॥

## Document Information

Text title : ShrI Shankaracharyashtakam
File name : shankarAchArya8shAntAnanda.itx
Category : aShTaka
Location : doc_deities_misc
Author : Swami ShAntanandasaraswati
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Sunder Hattangadi sunderh at hotmail.com
Proofread by : Sunder Hattangadi sunderh at hotmail.com
Latest update : July 14, 2016
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીશઙ્કરાચાર્યાષ્ટકમ્ ॥

શ્રીગણેશાય નમઃ ।
અથ શ્રીશઙ્કરાચાર્યાષ્ટકમ્ ।
ધર્મો બ્રહ્મેત્યુભયવિષયં જ્ઞાપયત્યેવ વેદો
નાયં લોકે પુરુષમતિજઃ કાવ્યકલ્પાનુકલ્પઃ ।
પ્રામાણ્યં ચ સ્વયમિહ ભવેદિત્યનૂદ્દિષ્ટવન્તં
ભાષ્યાચાર્યં પ્રણમત સદા શઙ્કરં ન્યાસિવર્યમ્ ॥ ૧॥

ધર્મો નિત્યં વિધિવિષયતો જ્ઞાપયત્યેષ વેદ-
સ્તસ્મિન્નિષ્ઠા દ્વિવિધમુદિતા કામજાકામજાભ્યામ્ ।
કામ્યં કર્મ ત્રિદિવભુવનાયેત્યનૂદ્દિષ્ટવન્તં
ભાષ્યાચાર્યં પ્રણમત સદા શઙ્કરં ન્યાસિવર્યમ્ ॥ ૨॥

કામાપેતં ભવતિ મનસઃ શોધનાયાત્ર લોકે
તસ્માન્નૂનં વિવિદિષતિ ના સાધનૈઃ સંયુતઃ સન્ ।
તસ્માદ્ધર્મં ચરત મનુજા ઇત્યનૂદ્દિષ્ટવનતં
ભાષ્યાચાર્યં પ્રણમત સદા શઙ્કરં ન્યાસિવર્યમ્ ॥ ૩ ॥

વેદો યસ્મિન્ વિધિમુખભિદા ષડ્વિધઃ શાસ્ત્રસિદ્ધો
વૈધો ભેદો દશહતશતં પૂર્વતન્ત્રે પ્રસિદ્ધઃ ।
ધર્માદ્યર્થઃ પ્રમિતિપુરતશ્ચેત્યનૂદ્દિષ્ટવન્તં
ભાષ્યાચાર્યં પ્રણમત સદા શઙ્કરં ન્યાસિવર્યમ્ ॥ ૪॥

અદ્વૈતાર્થગ્રહણપટુતાં પૂર્વતન્ત્રાનુકૂલં
શાસ્ત્રાજ્જ્ઞાત્વા કુરુત સુધિયો ધર્મચર્યાં યથાર્થમ્ ।
નોચેત્કષ્ટં નરકગમનં ચેત્યનૂદ્દિષ્ટવન્તં
ભાષ્યાચાર્યં પ્રણમત સદા શઙ્કરં ન્યાસિવર્યમ્ ॥ ૫॥

દ્વૈતં મિથ્યા યદિ ભવતિ ચેત્પ્રાપ્યતેઽદ્વૈતસિદ્ધિ-
સ્તસ્યાઃ પ્રાપ્ત્યૈ પ્રથમમધુના સાધ્યતે દ્વૈતનિષ્ઠમ્ ।
મિથ્યાત્વં યચ્છ્રુતિશતગતં ચેત્યનૂદ્દિષ્ટવન્તં
ભાષ્યાચાર્યં પ્રણમત સદા શઙ્કરં ન્યાસિવર્યમ્ ॥ ૬॥

નાના નેહેત્યુપદિશતિ વાગ્દ્વૈતમિથ્યાત્વસિદ્ધ્યૈ
દ્વૈતં મિથ્યા પરિમિતિગતેર્દૃશ્યતઃ સ્વપ્નવત્સ્યાત્ ।
એવંરૂપા હ્યનુમિતિમિતિશ્ચેત્યનૂદ્દિષ્ટવન્તં
ભાષ્યાચાર્યં પ્રણમત સદા શઙ્કરં ન્યાસિવર્યમ્ ॥ ૭॥

એવં મિથ્યા જગદિદમિતિ જ્ઞાયતાં નિશ્ચયેન
બ્રહ્માહં ચેત્યલમનુભવઃ પ્રાપ્યતાં વેદવાક્યાત્ ।
શાન્તો ભૂયાત્ તદનુ ચ સુખં ચેત્યનૂદ્દિષ્ટવન્તં
શાન્ત્યાનન્દઃ પ્રણમતિ યતિઃ શઙ્કરાચાર્યમૂર્તિમ્ ॥ ૮॥

શાન્ત્યાનન્દસરસ્વત્યા કૃતં શાઙ્કરમષ્ટકમ્ ।
યઃ પઠેદ્ભક્તિસંયુક્તઃ સ સર્વાં સિદ્ધિમાપ્નુયાત્ ॥ ૯॥

ઇતિ શ્રીપરમહંસપરિવ્રાજકાચાર્યશ્રીશાન્ત્યાનન્દસરસ્વતિવિરચિતં
શ્રીશઙ્કરાચાર્યાષ્ટકં સમાપ્તમ્ ॥

Encoded and proofread by Sunder Hattangadi sunderh at hotmail.com

.. ShrI Shankaracharyashtakam ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*